# Parivartanam

# परिवर्तनम्

## Document Information

Text title : Parivartanam - Transformation - Story

File name : parivartanamkathA.itx

Category : misc, kathA

Location : doc_z_misc_general

Transliterated by : Swaroop Bhagwat

Proofread by : Swaroop Bhagwat

Description/comments : From Loka Sanskritam magazine May 1991

Latest update : March 19, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2023

*sanskritdocuments.org*

# परिवर्तनम्

गुणानुरागी राजा भोजः मालवादेशे राज्यं करोति स्म । तस्य राज्यव्यवस्था तथा आसीत् यथा कोऽपि तत्र चौर्यं कर्तुं न उत्सहते स्म ।

तस्मिन् राज्ये आसीत् कश्चित् नराधमः दुर्मुखः नाम । उज्जयिनीनगरे स चौर्यं कर्तुं बहु अयतत किन्तु सर्वदा असफलः अभवत् । अन्ते खिन्नः सः राज्यं त्यक्त्वा वनं गतः । वने कश्चित् आश्रमः आसीत् । तत्र स साधुमहाराजं वासस्थानं अयाचत । साधुः तस्मै न केवलं वासस्थानं अददात्, तस्य आतिथ्यमपि अकरोत् । अतिचकितः चोरः तत्रैव रात्रिं अयापयत् । परदिने सः साधु स्वकीयगुरुं कर्तुं इच्छन् तस्य सकाशं गत्वा शिक्षां प्राप्तुं इच्छां प्राकटयत् ।

साधुः अवदत् - वरं ! उपदेशं ददामि किन्तु त्वया मम वचनद्वयं स्वीकरणीयं आचरणीयं च । प्रथमम्, कदापि असत्यं न वद । द्वितीयम्, यस्मिन् गृहे खादसि तत्र चौर्यं मा कुरु । अन्यान् दुर्गुणान् त्यजेः न वा किन्तु एतत् वचनद्वयं त्वया आचरणीयम् ।

सः गुरोः वचनं स्व्यकरोत् । परन्तु स्वभावः दुरतिक्रमः ।

एकदा दुर्मुखः सामन्तस्य वेशं धारयित्वा भोजराजस्य प्रासादे चौर्यं कर्तुं गतः । द्वारपालः तं अपृच्छत् कस्त्वं ? अहं चोरः इति दुर्मुखः उदतरत् ।

द्वारपालः चकितः । कोऽपि चोरः आत्मानं चोरं न घोषयति । एष कदापि चोरः भवितुं न शक्नोति । निश्चितं एष सामन्तः एव । एवं विचार्य द्वारपाल तस्मै निर्विघ्नं प्रवेशं दत्तवान् ।

दुर्मुखः मनसि गुरोः प्रतापं प्रशंसन् अभ्यन्तरं गत्वा कस्मिंश्चित् कोणे गुप्तं अतिष्ठत् । किञ्चित्कालात् परं राजा बहिर्निर्गतः । चोरः अवसरं प्राप्य मणिमुक्तादीनां पोटलीं कृत्वा यदा प्रस्थातुं उद्यतः तदा तस्य दृष्टिः चतुःषष्टिमिष्टान्नैः सज्जितायां भोजनस्थाल्यां अपतत् । परन्तु यदा सः खादितुं अगच्छत् तदा तस्य मनसि गुरोः द्वितीयशिक्षायाः स्मृतिः जागरिता “यस्मिन् गृहे खादसि तत्र चौर्यं मा कुरु” इति । स्थालीं त्यक्त्वा पोटलीं च विहाय गुप्तमार्गेण सः प्रासादात् बहिर्निर्गतः ।

राजा प्रत्यागत्य अद्भुतं चोरकार्यं दृष्ट्वा चकितः । परदिने सः द्वारपालं चोरस्य अन्वेषणाय प्रेषितवान् । बहुकालं अन्वेषणात् परं सः दुर्मुखः राज्ञः समक्षं आनीतः ।

दुर्मुखः राजानं यथायथं सत्यं अवदत् । राजा तस्मै विपुलं धनं दत्त्वा तं अमोचयत् ।

चोरः अचिन्तयत् - “मम गुरुः अतीव प्रतापी । धन्योऽधुनाहम् । पुरस्कारधनमिदं गुरुचरणे

निवेद्य आश्रमे निवस्तुं निवेदयिष्यामि । गुरोः वचनस्य आचरणेन मया समाजे सम्मानः प्राप्तः, राजमानं धनं च लब्धम् । ”
शनैः शनैः दुर्मुखस्य सर्वे दुर्गुणाः दूरीभूताः । सः दुर्मुखतां परित्यज्य सुमुखः नाम महात्मा अभवत् । - सुमेधाः

Encoded and proofread by Swaroop Bhagwat

*Parivartanam*

pdf was typeset on March 19, 2023

Please send corrections to *sanskrit@cheerful.com*